श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्री शठकोपाचार्य कृतं

# ॥ श्री शौरिराजभुजङ्गम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री शौरिराजभुजङ्गम् ॥

प्रसन्नाम्बुजाक्षं लसत्केशपाशं
    स्फुटत्तुङ्गनासं स्फुरन्मन्दहासम्।
प्रयोगात्तचक्रं सशङ्खाभिरामं
    परं पद्मनाभं भजे शौरिराजम्॥ 1 ॥

स्फुरच्चारुपुण्ड्रं लसद्यज्ञसूत्रं
    चलत्पीतचेलं तटित्तुल्यवेगम्।
क्वणन्नूपुराढ्य भ्रमन्पादपद्मं
    सुभूषोज्ज्वलाङ्गं भजे शौरिराजम्॥ 2 ॥

घुमच्चारुगन्धं ज्वलद्दीपराशिं
    नदद्वेदघोषं डमड्वाद्यनादम्।
लसच्चारुवेषं मिलत्साधुसङ्घं
    नमद्भक्तवर्गं भजे शौरिराजम्॥ 3 ॥

पतिं पद्मजायाः क्षमाकान्तमीड्यं
    गतिं सज्जनानां गरुत्मत्सुपूज्यम्।
नमद्भक्तपालं नरोत्तं समाद्यं
    भवाम्भोधिपोतं भजे शौरिराजम्॥ 4 ॥

शुभे नित्यवापीतटे कृष्णपुर्यां
    सुधासिन्धुकन्यायुतं पद्मिनीशम्।
चिदानन्दमूर्तिं चिरण्डीमनोज्ञं
    सतां बन्धुमीशं भजे शौरिराजम्॥ 5 ॥

मुदा माघमासे महाब्धेस्सुतीर्थं
    विहारं भजन्तं सुदाशश्च पूज्यम्।
मनोहारिवेषान् दधन्तं लसन्तं
    सदानन्दपूर्णं भजे शौरिराजम्॥ 6॥

परव्यूहभेदैः द्विपञ्चावतारैः
    तथान्यैः स्वरूपैः समर्चां भजन्तम्।
वसन्ते हृदाब्जे सतां योगिवर्यैः
    सदा ध्यायमानं भजे शौरिराजम्॥ 7॥

खगेशं भुजङ्गं तुरङ्गं प्लवङ्गं
    मृगेन्द्रं सुमञ्चं विमानं रथं च।
अलङ्कारभेदैः समारुह्य प्रीत्या
    स्वपुर्यां चरन्तं भजे शौरिराजम्॥ 8॥

तरण्डे प्रदीप्ते प्रियाभिः समेत्य
    तटाके सुरम्ये प्लुतिं संभजन्तम्।
सुडोलाधिरूढं स्वलङ्कारवेषैः
    मनोहारिणं तं भजे शौरिराजम्॥ 9॥

पुरे सौधरम्ये वने कृष्णनाम्नि
    दयापूर्णमूर्तिं सदा सुन्दराङ्गम्।
प्रियाश्लिष्टगात्रं पृथापुत्रमित्रं
    परब्रह्मरूपं भजे शौरिराजम्॥ 10॥

भुजङ्गप्रयातेन वृत्तेन भक्त्या
    शठारातिनाम्ना कृतं स्तोत्रमेतत्।
रथाङ्ग प्रयोगे प्रसिद्धं प्रणम्य
    विभुं शौरिराजं सुखं सन्तनोतु॥ 11॥

॥ श्री शौरिराजभुजङ्गं समाप्तम् ॥